Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 6 | ISSN : 2581- 6306

# बौद्धदर्शने मोक्षनिरूपणम्

**खोकनदासः**

**शोधछात्रः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।**

**सारांशः** -मोक्षः हि जीवानां पुर्णमुक्तिः। आत्मज्ञानेन जीवस्य मोक्षप्राप्तिः भवति। पुनश्च जन्मान्तरचक्रात् मुक्तो भवति । मोक्षावस्थायां यस्य एतद् ज्ञानं भवति परमात्मा स्वरूपतः एकमभिन्नञ्चेति। वस्तुतः मोक्षलाभस्य उपायः मार्गत्रयेण उल्लिख्यते। यथा ज्ञानं धर्मः भक्तिश्चेति। तेषु जीवात्मा स्वप्रकृत्यनुसारम् एकम् अवलम्ब्य मोक्षमार्गे अग्रसरति। अतः मया **बौद्धदर्शने मोक्षनिरूपणम्**इति शीर्षकमाश्रित्य कथं बौद्धदर्शने तद्विचारः विहितः इति स्वल्पमतिना मया शोधलेखोऽयं विलिख्यते।

**विशेषशब्दाः- बोद्धधर्मः,मोक्षः, निर्वाणः, पुरुषार्थः, कैवल्यम् अविद्या इत्यादयः।**

---

**"धर्मे चार्थे च कामे च मोक्षे च भरतर्षभः।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।। "**[1]

**भूमिका- मुच् धातोःघञ्** प्रत्यये कृते सति मोक्षशब्दोऽयं निष्पद्यते। **"मोक्ष्यते दुःखमनेन"** –इति व्युत्पत्त्यनुसारेण ज्ञायते यत् येन ऐकान्तिकदुःखनिवृत्तिः भवति स एव मोक्षः। कथ्यवस्तु अवलम्ब्यप्रयोजनसाधककाम्यवस्तुचतुष्टयस्य उल्लेखः परिलक्ष्यते। ते यथा- धर्मार्थकाममोक्षाश्चेति। पुरुषार्थचतुष्टयेन भारतीयधर्मशास्त्रे नीतिशास्त्रे च श्रेयप्रेयवस्तुनः पार्थक्यं परिलक्ष्यते। पुत्र–परिवार–प्राणिनः इत्यादीनि सुखदायकवस्तूनि प्रेयवस्तूनि। पुनः प्रेयः हि निःश्रेयसः। ये खलु प्रेयमार्गस्य अनुसरणं कुर्वन्ति, तेषां मते धर्मार्थकामवर्गत्रयम् एव पुरुषार्थस्वरूपम्। ते मन्वन्ते अर्थकामौ गौणपुरुषार्थौ,धर्मश्च मुख्यपुरुषार्थः। परन्तु ये निःश्रेयसं काम्यन्ति तेषां मते मोक्षः एव परमपुरुषार्थः। यस्य प्राप्त्यनन्तरं कामनायाः निवृत्तिः भवति, तत्र आकांक्षा न भवति, प्रयोजनस्य अपि अवसानं भवति स एव परमपुरुषार्थः मोक्षः।

**बौद्धेतरास्तिकदर्शनसम्मतं मोक्षनिरूपणम्-** त्रितापयुक्तमानवाः दुःखनिवृत्युपायस्य अन्वेषणं कुर्वन्ति। देशे देशान्तरे वा युगे युगान्तरे वा भारतीयदर्शनेषु चार्वाकं विना सर्वत्रैव परमलक्ष्यम् आत्यन्तिकदुःखनिवृत्तिः।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

प्राचीनकालादारभ्यो दार्शनिकाः यत्पुरुषार्थचतुष्टयं स्वीकुर्वन्ति तेषु प्राक्-त्रयाणां प्रयोगेण सामयिकदुःखनिवृत्तिःभवति, न तु आत्यन्तिकदुःखनिवृत्तिः। मोक्षः हि आत्यन्तिकदुःखनिवृत्तिः।

चार्वाकं विना सर्वे भारतीयदार्शनिकाः मोक्षमार्गेणैव आत्यन्तिकदुःखनिवृत्तिः इति उल्लिख्यन्ते। परन्तु कथम् इयं निवृत्तिः सम्भवति इति विषये दर्शनान्तरे मतान्तरं परिलक्ष्यते। ईश्वरकृष्णविरचितायां सांख्यकारिकायाम् एतद्विषये वर्णितम् -

**"दुःखत्रयाभिघाताज्जिज्ञासा तदवघातके हेतौ।**

**दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात्।।**[2]

अर्थात् अत्र उच्यते दुःखत्रयम् आध्यात्मिकम् आधिदैविकम् आधिभौतिकम् चेति । अस्मिन् जगति यथा दुःखकारणम् अस्ति तथैव दुःखनिवृत्तेः उपायोऽपि अस्ति। दृष्टोपायेन दुःखस्य सामयिकनिवृत्तिः भवति । आत्यन्तिकदुःखनिवृत्यर्थं तत्त्वज्ञानम् आवश्यकम्। आचार्यपतञ्जलिना योगदर्शने पुरुषार्थविषये उक्तम् - **"पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति"**[3] - अर्थात् कैवल्यः पुरुषस्य न अवस्थान्तरं केवलं स्वरूपेऽवस्थानम्। परन्तु बुद्धेः तथा गुणत्रयस्य प्रलयः भवति। अत्रमोक्षेण जागतिकदुःखानां निवृत्तिर्भवति। अयंमोक्षः एव परमपुरुषार्थः। नैयायिकमतेऽपि दुःखस्य आत्यन्तिकनिवृत्तिः हि मोक्षः परन्तु सांख्य-योग-वेदान्तवादीनां मध्ये पुरुषार्थविषये मतान्तरं परिलक्ष्यते। गौतमाचार्येण पुरुषार्थविषये न्यायसूत्रे उक्तम् - **"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदन्तरापायापवर्गः"**[4] अर्थात् दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम् उत्तरोत्तरापाये अपवर्गः भवति। वैशेषिकसूत्रे मुक्तेः स्वरूपविषये आचार्यकणादेन उक्तम् - **"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः"**[5]अर्थात् अत्र उच्यते तत्त्वज्ञानेन मोक्षलाभः हि धर्मः। मीमांसादर्शनेअपि पुरुषार्थविषये आलोचनापरिलक्ष्यते। प्राचीनमीमांसकैः मोक्षविषये उक्तम् - **"स्वर्गलाभो हि पुरुषार्थः। वेदविहितकर्मानुष्ठानेन स्वर्गलाभसम्भवः"**।[6]परन्तु नव्यमीमांसकैः(प्रभाकरमिश्रः कुमारिलभट्टः इत्यादयः)मोक्षविषये उक्तम्- **"आत्मज्ञानेन प्राप्यते यः पुरुषार्थः सैव मोक्षः।"**[7] अद्वैतवेदान्ते अपि **"कैवल्यशब्देन मोक्षः एव बोध्यते"**। जीवब्रह्मणोश्च अभेदज्ञानेन यदा अविद्या विनष्टा भवति तदा साधकस्य ब्रह्मप्राप्तिःभवति।अयं ब्रह्मप्राप्तिरेव मोक्षः। वेदान्तसारे शङ्कराचार्येण उक्तम्- **"सम्यग्दर्शनविध्वस्ततमससां तु नित्यसिध्यनिर्वाणपरायणानां सिद्धा एव अनावृत्तिः, तदाश्रयणेन एव हि सगुणसरणानाम् अपि अनावृत्तिसिद्धिः"**[8]।सम्यग्दर्शनेन येषां तमो विध्वस्तोऽभवत् तेषां नित्यसिद्धनिर्वाणपरायानाम्अनावृत्तिः सिद्धा अस्ति। तदेव बह्मलोके उत्पन्ननिर्गुणपरब्रह्मरूपात्मज्ञानस्य आश्रयत्वेन सगुणविद्यायाः अनुशीलनकारीणाम् अनावृत्तिः सिद्धा भवति । अतः निर्गुणपरब्रह्मविज्जनानां पुनरावृत्तिः न भवति।

मोक्षविषये जैनाचार्याणां मते मिथ्याज्ञानमेव बन्धकारणम्। जीवाजीवयोरभेदज्ञानं हि मिथ्याज्ञानम्। जडवस्तुना सह आत्मनः संयोगेनबन्धो जायते। अयमेव आश्रवः। अस्य बन्धस्य प्रतिरोधं करोति संवरः।अनन्तरं निर्जरया मोक्षलाभो भवति ।

**बौद्धदर्शनसम्मतं मोक्षनिरूपणम्-** बौद्धदर्शनमते मोक्षस्य पारिभाषिकशब्दः हि निर्वाणः। मोक्षः अत्र निर्वाणशब्देन अभिधीयते। अत्र निर्वाणविषये विविधप्रश्नाः परिलक्ष्यन्ते। कस्य निर्वाणः भवति ? निर्वाणस्य स्वरूपं किम् ? कथं निर्वाणः सम्भवति ? एते प्रश्नाः बौद्धदार्शनिकाः विस्तृतरूपेण आलोचनं कुर्वन्ति। नि–पुर्वकं वि–धातोत्तरं क्तप्रत्यये निर्वाणशब्दः निष्पद्यते। निर्वाणशब्दः पालिभाषायां कथ्यते **'निव्वाणः'**। वाणशब्दः तृष्णायाः नामान्तरमिति। तृष्णा अपरसाधारणसहकारिसहयोगेन जीवान्रज्जुवत् बध्नाति, तदर्थं वाणः इत्युक्तम्। अत्र नि–उपसर्गेण तृष्णायाः अभावः सूच्यते। अतः यस्यज्ञानेन जन्मजन्मान्तरतृष्णायाः बन्धनाशोभवति तस्य नाम निर्वाणः।

पुनश्च कथ्यते तस्य व्युत्पत्तिगतोऽर्थः हि शीतलं लीनं वा। लीनम् इत्यनेन बोध्यते सत्यायाः अवलुप्तिः। बौद्धदार्शनिकानां मते वासना एव जीवनम्। जीवनं खलु दुःखस्वरूपम्। वासनाविनाशेन दुःखस्य विनाशः भवति। यया कामनया मानवाः दुःखिताः भवन्ति तस्याः पूर्णनाशः हि निर्वाणः।

**निर्वाणस्य स्वरूपविषयेबौद्धदार्शनिकानां मतम्-** बौद्धमतेनिर्वाणः कः इति विषये स्पष्टरूपेण न कुत्रापि उल्लेखितः। अस्मिन् विषये सिद्धान्तप्रदानात् पूर्वं विविधदार्शनिकानां मतानां पर्यालोचनम् आवश्यकम्। बौद्धदार्शनिकानां मध्ये कोऽपि निर्वाणम् अभावात्मकावस्थां न गृह्णाति। निर्वाणः खलु भावात्मकावस्था। बौद्धदार्शनिकानां मध्ये स्वस्वदृष्ट्यनुसारं निर्वाणस्य व्याख्याप्राप्यते। वाराणस्यां धर्मचक्रप्रवर्तने भगवता बुद्धेन निर्वाणसम्बन्धे उक्तम् –

**"अनेकजातिसंसारं संधावित्वा पुनः पुनः।**
**विसंस्कारगते चित्ते इहैव क्षयमध्वगाः॥**[9]

अत्र उच्यते चित्तं यदा निर्मलम् अर्थात् क्रोधादिशून्यं भवति तदा निर्वाणं प्राप्नोति। अतः रागादीनां पूर्णनिवृत्तिः हि मोक्षः। रागादिशून्यचित्तं यदा निर्वाणमुखं भवति तदा तच्चित्तम् एकाग्रतां प्राप्नोति । अथवा तपस्यया चित्तक्लेशाः यदा दूरीभूताःभवन्ति तदैव तस्य निर्वाणोपलब्धिः जायते। अस्मिन् प्रसङ्गे महाकविना अश्वघोषेण सौन्दरनन्दमहाकाव्ये उक्तम् –

**"दीपो यथा निवृतिमभ्युपेतो नैवावनिं गच्छति नान्तरीक्षम्।**
**दिशं न काञ्चित् विदिशं न काञ्चित् स्नेहक्षयात् केवलमेति शान्तिम्॥**
**एवं कृती निवृत्तिमभ्युपेतो नैवावनिं गच्छति नान्तरीक्षम्।**

**दिशं न काञ्चित् विदिशंन काञ्चित् क्लेशक्षयात् केवलमेति शान्तिम्।। ”**[10]

अर्थात् अत्र उच्यते यदा प्रदीपः निर्वापितः भवति तदास पृथिव्याम् अन्तरीक्षे वा न कुत्रापि गच्छति,न दिक्-दिगान्तरमपि। तैलादिपदार्थस्य क्षयेण स चिरशान्तिं लभते। तद्रूपं मुमुक्षवः निर्वाणेन पृथिव्यन्तरीक्षयोर्वा न कुत्रापि गच्छन्तिन दिक्-दिगान्तरमपि।अपिच चित्तक्लेशक्षयेण परमशान्तिं लभन्ते।

भारतीयदर्शने निर्वाणसम्बन्धे उक्तम्-अविद्या दुःखस्य मुख्यकारणम्। अविद्यायाः संस्कारः जायते। संस्कारात् विज्ञानादिक्रमेण कार्यकारणशृङ्खला बोध्यते। यस्याः नामान्तरं भवचक्रः। अस्मात् भवचक्रात् निष्कृतिलाभःनिर्वाणः। तृष्णाजातवासनायाः नियन्त्रणं कृत्वा ध्यानेन पूर्णप्रज्ञया च आसक्तिबन्धः छिन्नः भवति। प्रदीपः तैलाभावेन यथा निर्वापितः भवति तथैव वासनाभावेन साधकः निर्वाणं लभते। अस्मिन् प्रसङ्गे बुद्धेन उक्तंदुःखस्य निरोधेनैव निर्वाणः प्राप्यते। अत्र प्रश्नः आयाति निर्वाणस्य अर्थः कः ? इत्यस्मिन् विषये बौद्धदार्शनिकानां मध्ये मतचतुष्टयं प्राप्यते -

1) **निर्वाणः** भवति अस्तित्वविलुप्तिः।

2) **निर्वाणः** भवति चिरन्तन-आनन्दमयावस्था।

3) **निर्वाणः** भवति अचिन्त्यनीयावस्था।

4) **निर्वाणः** भवति अन्तर्निहित-अपरिवर्तनीयावस्था।

अस्मिन् प्रसङ्गे नागार्जुनेन मूलमाध्यमिककारिकायाम् उक्तम् -

**“अप्रतीतम् असम्प्राप्तम् अनुच्छिन्नमशाश्वतम्।**

**अनिरुद्धम् अणुत्पन्नम् एतन्निर्वाणमुच्यते।। ”**[11]

अत्र उच्यते परमविज्ञाननिरोधानन्तरं चित्तसन्ततेः या अवस्था सा प्रतीतिः न भवति। न लब्धमिदं वर्तते। इयमवस्था कस्यचित् शाश्वतपदार्थस्य नाशं न करोति। भग्नावस्थायाःशाश्वतभावप्राप्तिः न भवति। इमाः लक्षणयुक्तावस्थाः निर्वाणः इत्यभिधीयते। पुनश्च दार्शनिकराधाकृष्णेन उक्तम्- **“निर्वाणस्य शून्येन विलोपः न भवति। केवलं सन्ततप्रवाहस्य अभावःआत्मनश्च स्वमध्ये निश्चितं प्रत्यावर्तनम्”**[12]। सर्वदर्शनसंग्रहकार-माधवाचार्येण मोक्षस्य स्वरूविषये उक्तम् -

**“ततश्च प्रागुक्तभावनाप्रचयबलात् निखिलवासनोच्छेदविगलित- विविधविषयाकारोपप्लवविशुद्धविज्ञानोदयो महोदयो”**[13] इति अर्थात् आर्यसत्यचतुष्टयभावनायाः विनाशेन विषयाकारमिथ्याज्ञानं दूरीभूतो भवति, अपिच

विशुद्धज्ञानस्य उत्पत्तिर्भवति। विशुद्धज्ञानमिदं महोदय-मोक्ष-निर्वाण-इत्यादिभिः अभिधीयते। शङ्कराचार्येण तस्य **सर्वसिद्धान्तसंग्रह**ग्रन्थे उक्तम्-

**"मूलाज्ञानानिवृत्तौ च विशुद्धज्ञानसन्ततिः।**

**शुद्धबुद्ध्यविशेषो हि मोक्षो बुद्धमुनीरितः॥ "**[14]

अर्थात् अज्ञानस्य निवृत्त्या शुद्धबुद्धिस्वरूपविशुद्धज्ञानस्य धारा प्रवहति बुद्धमते अयमेव मोक्षः। अन्तेऽपि कथ्यते यत् विविधबौद्धसम्प्रदायदर्शनात् बुद्धदेवस्य मुख्यवक्तव्यम् उद्धारं न केवलं दुष्करम् अपिच असम्भवम्। अनया दृष्ट्या उच्यते सम्प्रदायभेदेन निर्वाणस्य भावात्मकता न समर्थिता। मुक्तपुरुषस्य परिणामः यः अनिर्देश्यः, तस्मिन् विषये व्यासदेवकृतमहाभारतस्य शान्तिपर्वणि प्राप्यते-

**"शकुनानामिवाकाशे मत्सानामिव चोदके।**

**पदं यथा न दृश्यते तथा ज्ञानविदां गतिः॥ "**[15]

सुतरां निर्वाणतत्त्वस्य उपरि बुद्ध-अश्वघोष-नागार्जुन-माधवाचार्य-शङ्कराचार्य-प्रभृतयः दार्शनिकाः यानि मतानि उपस्थापितवन्तः तेषां मतानाम् उपरि आधारीकृत्य उच्यते यत्- जागतिकमानवानां मानसिकतृष्णायाः यदि अभावः दृश्यते तर्हि चित्तशून्यो भवति। फलस्वरूपं साधकस्य मिथ्याज्ञानाभावेन विशुद्धज्ञानस्य आविर्भावेन साधकः निर्वाणयुक्तः भवेत्।

**अन्तटीप्पणी-**

---

1.महाभारतम्- 1/62/53

2.सांख्यकारिका-1

3.योगसूत्रम्-4/33

4.न्यायसूत्रम्- 1/2/1

5.वैशेषिकसूत्रम्-1/2/1

6.भारतीयदर्शनम् (सुमितावसुः)- p-122

7.भारतीयदर्शनम् (सुमितावसुः)- p-122

8.वेदान्तदर्शनम् (स्वामी विश्वरूपानन्दः)- 7- 4/4/22

9.भारतीयदर्शनम्,- (डः विपद्-भञ्जनपालः),p-143
10.गौतमबुद्धस्य धर्मः दर्शनञ्च,(डः सुकोमलचौधुरी),P-189
11.गौतमबुद्धस्य धर्मः दर्शनञ्च,(डः सुकोमलचौधुरी),P-195
12.भारतीयदर्शनम्,- (डः विपद्-भञ्जनपालः),p-144
13.भारतीयदर्शनम् (सुमितावसुः)- p-126
14.भारतीयदर्शनम् (सुमितावसुः)- p-126
15.**भारतीयदर्शनम्** (सुमितावसुः)- p-126

## सन्दर्भग्रन्थसूची-

1.महाभारतम्-व्यासदेवः,गीताप्रेस,गोविन्दभवन कार्यालयः,कोलकाता।
2.ईश्वरकृष्णःसांख्यकारिका, सम्पा- आचार्यज्योति-सेनगुप्ता,संकृत वुकडिपो कोलकाता2014।
3. पतञ्जलिः, योगसूत्रम्,स्वामीभर्गानन्दः,उद्बोधनकार्यालयःकोलकाता,2004
4. गौतमः, न्यायसूत्रम्,सम्पा-सच्चिदानन्दमिश्रः, भारतीयविद्या प्रकाशन,दिल्ली,1999।
5. कणादः वैशेषिकसूत्रम्,सम्पा- अमित भट्टाचार्यः,संस्कृत वुकडिपो,कोलकाता, 2012।
6. भारतीयदर्शनम्, डः सुमिता-वसुः, अभिनवमुद्रणी,कलकाता,2011।
7.वादरायणः,वेदान्तदर्शनम्,सम्पा-स्वामीविश्वरूपानन्दः,उद्बोधनकार्यालयः, कलकाता1989।
9. गौतमबुद्धस्य धर्मः दर्शनञ्च,सम्पा-डः सुकोमलचौधुरी,महावोधिवुक एजेन्सि, कलकाता, 2010।
10.भारतीयदर्शनम्,सम्पा-डः विपद्-भञ्जनपालः,संस्कृतपुस्तकभाण्डार,कलकाता,2014।
11. श्रीमद्भागवद्गीता, सम्पा- स्वामी भावघनानन्दः ,उद्बोधनकार्यालयः,कलकाता,2013।